# Shri Jagannathashtakam

# શ્રીજગન્નાથાષ્ટકમ્

## Document Information

Text title : jagannAthAShTakam 1

File name : jagannAthAShTaka.itx

Category : aShTaka, vishhnu, jagannatha, vishnu, shankarAchArya

Location : doc_vishhnu

Author : Shankaracharya

Proofread by : NA

Latest update : July 10, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 10, 2024

*sanskritdocuments.org*

Shri Jagannathashtakam

# શ્રીજગન્નાથાષ્ટકમ્

કદાચિત્કાલિન્દીતટવિપિનસઙ્ગીતકરવો var કવરો
મુદા ગોપીનારીવદનકમલાસ્વાદમધુપઃ । var ભીરી
રમાશમ્ભુબ્રહ્મામરપતિગણેશાર્ચિતપદો
જગન્નાથઃ સ્વામી નયનપથગામી ભવતુ મે ॥ ૧ ॥

ભુજે સવ્યે વેણું શિરસિ શિખિપિંછં કટિતટે var પિચ્છિં
દુકૂલં નેત્રાન્તે સહચરકટાક્ષં વિદધતે ।
સદા શ્રીમદ્વૃન્દાવનવસતિલીલાપરિચયો
જગન્નાથઃ સ્વામી નયનપથગામી ભવતુ મે ॥ ૨ ॥

મહામ્ભોધેસ્તીરે કનકરુચિરે નીલશિખરે
વસન્ પ્રાસાદાન્તસ્સહજબલભદ્રેણ બલિના ।
સુભદ્રામધ્યસ્થસ્સકલસુરસેવાવસરદો
જગન્નાથઃ સ્વામી નયનપથગામી ભવતુ મે ॥ ૩ ॥

કૃપાપારાવારાસ્સજલજલદશ્રેણિરુચિરો
રમાવાણીસૌમસ્સુરદમલપદ્મોદ્ભવમુખૈઃ । var વાણીરામસ્
સુરેન્દ્રૈરારાધ્યઃ શ્રુતિગણશિખાગીતચરિતો
જગન્નાથઃ સ્વામી નયનપથગામી ભવતુ મે ॥ ૪ ॥

રથારૂઢો ગચ્છન્ પથિ મિલિતભૂદેવપટલૈઃ
સ્તુતિપ્રાદુર્ભાવં પ્રતિપદ મુપાકર્ણ્ય સદયઃ ।
દયાસિન્ધુર્બન્ધુસ્સકલજગતા સિન્ધુસુતયા
જગન્નાથઃ સ્વામી નયનપથગામી ભવતુ મે ॥ ૫ ॥

પરબ્રહ્માપીડઃ કુવલયદલોત્ફુલ્લનયનો
નિવાસી નીલાદ્રૌ નિહિતચરણોઽનન્તશિરસિ ।
રસાનન્દો રાધાસરસવપુરાલિઙ્ગનસખો
જગન્નાથઃ સ્વામી નયનપથગામી ભવતુ મે ॥ ૬ ॥

ન વૈ પ્રાર્થ્યં રાજ્યં ન ચ કનકતાં ભોગવિભવં
ન યાચેઽહં રમ્યાં નિખિલજનકામ્યાં વરવધૂમ્ ।
સદા કાલે કાલે પ્રમથપતિના ગીતચરિતો
જગન્નાથઃ સ્વામી નયનપથગામી ભવતુ મે ॥ ૭ ॥

હર ત્વં સંસારં દ્રુતતરમસારં સુરપતે
હર ત્વં પાપાનાં વિતતિમપરાં યાદવપતે ।
અહો દીનાનાથં નિહિતમચલં નિશ્ચિતપદં
જગન્નાથઃ સ્વામી નયનપથગામી ભવતુ મે ॥ ૮ ॥

ઇતિ શ્રીમદ્ શઙ્કરાચાર્યપ્રણીતં જગન્નાથાષ્ટકં સમ્પૂર્ણં ॥

*Shri Jagannathashtakam*

pdf was typeset on July 10, 2024

Please send corrections to *sanskrit@cheerful.com*